# वन्दनम्

संगच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ।।
समानो मन्त्रः समितिः समानी
समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभिमन्त्रये वः
समानेन वो हविषा जुहोमि ।।
समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ।।

(संज्ञानसूक्तम्, ऋग्वेदः)

जनाः समाजे संगताः गच्छेयुः । परस्परं विरोधं विहाय एकविधम् एव वचनं वदेयुः । तेषां चित्ते समभावना सम्भवतु । सर्वे एकमताः तिष्ठेयुः ।

समाजे स्थितानां जनानां कार्याकार्यपर्यालोचनात्मकं गुप्तसम्भाषणम् एकरूपम् अस्तु । कार्येषु जनानां प्रवृत्तिः एकरूपा भवतु । प्रतिदिनं सर्वेषां कर्म अपि समानरूपं भवतु । समेषाम् अन्तःकरणं समानं भवेत् । एवं सर्वे सामाजिकाः भवन्तु । एवमेव सङ्कल्पैः सर्वेषां हृदयानि इन्द्रियाणि च समानरूपाणि यथा भवेयुः, तथा अस्माभिः प्रयत्नः करणीयः इति प्रार्थना ।

